लोकप्रियसाहित्यग्रन्थमाला - १७

# आचार्यरतिनाथझारचनावली

सम्पादकः

सूर्यप्रकाशव्यासः

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

लोकप्रियसाहित्यग्रन्थमाला - १७

# आचार्यरतिनाथझारचनावली

प्रधानसम्पादकः

**प्रो० राधावल्लभत्रिपाठी**

कुलपतिः

सम्पादकः

**प्रो० सूर्यप्रकाशव्यासः**

संस्कृतविद्या-धर्मविज्ञान-संकायः

काशीहिन्दूविश्वविद्यालयः

वाराणसी

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# पुरोवाक्

विदन्त्येव विज्ञा यत् साम्प्रतिकेऽस्मिन्नतिविचित्रसमयान्विते समये संस्कृते विपुलं वाङ्मयं विरच्यते सुरसरस्वतीसमाराधकैः। विंशशताब्दी-संस्कृतसाहित्येतिहासस्य स्वर्णकाल इति युक्तमुक्तवान् सुकवी राजेन्द्रमिश्रः। अस्यां विंशशताब्द्यां परम्परा आधुनिकतामालिङ्गति, प्राचीनं शास्त्रवैभवम् आधुनिकज्ञानविज्ञानरत्नैश्च सङ्गतं विद्योततेतराम्। वस्तुतः समसामयिकसंस्कृत-साहित्यस्य नवोन्मेषः कामपि विशिष्टामभिख्यां तनोति स्वकीयाम्। अस्मिन् नवोन्मेषे ये महान्तः शास्त्रधुरीणाः पण्डिता सरसललितनवकाव्य-विधानविचक्षणाश्च सुकवयः किमपि विलक्षणम् अवदानं प्राकटयन् तेषु कविवरेण्यो रतिनाथझावर्योऽग्रगण्यः। वस्तुतो विच्छित्तिविशेषरम्याभिः सदुक्तिभिः सहृदयानां सविशेषं मनो हरति स्म कविरयम्। तेनायं काश्याः कविभारतीकुसुमाञ्जल्यां प्रायः पञ्चाशद् वर्षाणि विकचनवकुसुममिव हृद्यावद्यपद्यसौरभमातताना। काशीहिन्दूविश्वविद्यालयसेवातो निवृत्तः कविरयं स्वगृहनगरं गतः, तत्र निवसन् यदा कदाचित् कविसहृदयगोष्ठीसु सस्पृहं श्लाघान्वितं स्मर्यते स्म।

बहुसंख्यकास्तदा तैस्तैः कविमित्रैरेनमधिकृत्य विरचिताः प्रशस्तयोऽत्र प्रमाणम्। प्रशस्तिकाव्यस्य भवति किमपि प्राशस्त्यं संस्कृतवाङ्मयपरम्परायाम्। वटुकनाथखिस्ते-रेवाप्रसादद्विवेदि-शिवज्युपाध्याय-शिवदत्त चजर्वेदि-मनुदेवभट्टाचार्यादिभिर्या रतिनाथप्रशस्तयो गुम्फितास्ता अस्य कवेः परिस्फुरन्तंप्रतिभा विशेषं प्रकरीकुर्वन्ति।

अथ दिवं प्रयातेऽस्मिन् हन्त विंशोनविंशशतकभवानां बहूनामसाधारणकविप्रतिभाजुषां साहित्यकाराणां यथा असंख्या बहुमूल्या रचना लयं यातास्तथैव अस्यापि सुकवेः कमनीय-कवितावितानं लोपं यास्यतीति चिन्ता बाधते स्म रतिनाथझाप्रशंसकानां समाजम्। दिष्ट्या मदनुरोधेन सुहृद्वर्यः सङ्कल्पाध्यवसायसूर्यः श्रीसूर्यप्रकाशव्यासो महताध्यवसायेन

## आचार्यरतिनाथझारचनावली

# ( आ ) अनुक्रमणिका


(अ) सम्पादकीयम् ii

(आ) अनुक्रमणिका viii

(इ) आचार्यरतिनाथझा : जीवनवृत्तम् xii

(ई) गुरूणां गुरुः पातु पादौ नमामि - श्री विजयनाथ झा xiv

(उ) कविप्रशस्तिः - पण्डितबटुकनाथशास्त्री खिस्ते xviii

(ऊ) कविप्रशस्तिः - आचार्यरेवाप्रसादद्विवेदः xviii

(ए) कविप्रशस्तिः - पण्डितमनुदेवः भट्टाचार्यः xix

(ऐ) कविप्रशस्तिः - पण्डितशिवजी उपाध्यायः xx

(ओ) कविप्रशस्तिः - आचार्यः विन्ध्येश्वरीप्रसादमिश्रः 'विनयः' xxii

(औ) कविप्रशस्तिः - डॉ. शिवदत्तशर्मा चतुर्वेदः xxii

प्रथमं सोपानम्
समस्यापूर्तयःप्रकीर्णछन्दांसि च

१. गणेशः १
२. देवीस्तुतिः २
३. दुर्गानिसर्गोज्ज्वला ४
४. लक्ष्मीः ५
५. हनुमन्तमीडे ६
६. वीरमङ्गलाष्टकम् ७
७. सरस्वती सा ८
८. वाणी ९
९. गीर्वाणवाणी ११
१०. वाणीविलसितम् ११





११. तत्संस्कृतम् १२
१२. तत्संस्कृतं जयति.... १९
१३. प्राच्यविद्या २३
१४. कविभारती २८
१५. राष्ट्रम् ३०
१६. गणतन्त्रम् ३१
१७. मुक्तिवाहिनी ३१
१८. राजते राजनीतिः ३२
१९. ग्रीष्मः ३३
२०. जलधरावाहनम् ३४
२१. कृष्णमेघः ३५
२२. मेघमाला ३६
२३. वारिवाहः ३६
२४. घनं प्रति ३७
२५. गन्धवाहः ४०
२६. वाताः ४१
२७. पूर्णचन्द्रः ४१
२८. चन्द्रः प्रवालप्रभः ४२
२९. कौमुदी ४३
३०. वसुन्धरा ४४
३१. मञ्जरी ४४
३२. कमलिनी ४५
३३. मधुलिहाम् ४६
३४. सौरभम् ४७
३५. सुमनसाम् ४७
३६. वैश्वानरः शीतति ४८
३७. तुहिनागमः ४९
३८. हिमागमः ५०
३९. वर्षितम् ५०
४०. शरद् ५२
४१. शरन्नितान्तम् ५३
४२. सन्ति सन्तो वसन्तः ५४
४३. हेमन्तः ५५
४४. कालस्य लीलायितम् ५७
४५. जीवितम् ५८
४६. लाभो महान् ५९

## ३. दुर्गा निसर्गोज्ज्वला

दैत्यत्रस्तसमस्तदेवविगलद्धाम्नां सुपुञ्जीभवन्-
मूर्त्तिः स्फूर्तिनिधिर्दुरन्तदुरितध्वान्तक्षयायोद्यता।
शम्भोर्निर्मलकान्तकोमलरुचा भूयः समुद्भासिता
भूयाद् भक्तजनोदयाय सदया दुर्गा निसर्गोज्ज्वला ।।१।।

आस्येनामृतदीधितिं त्वधरयन्त्यक्लेशया भूभृतां
पत्युर्गौरवशालिनी त्रिभुवने कन्यातिधन्योद्गता ।
शूली यां परिणीय विस्मृतगदो मृत्युञ्जयोऽभूदद्भुतं
सा देवी रमतां चिराय हृदये दुर्गा निसर्गोज्ज्वला ।।२।।

यस्या आस्यमुपास्य दास्यविधया धन्यः सुधादीधितिः
शारद्यः कृतकृत्यतामनुभवन् पूर्णत्वमापद्यते ।
सिद्धिर्लास्यमनारतं प्रकुरुते यस्याः समक्षं मुदा
जीयात् सा शरदिन्दुसुन्दरमुखी दुर्गा निसर्गोज्ज्वला ।।३।।

देवादीनपि बाधितुं कृतमत्तीन् रक्षःपतीन् सद्गतीन्
कर्तुं सङ्गरमारचय्य सुमरैश्शस्त्रैस्तथास्त्रैर्घ्नती ।
लोकत्राणपरायणा पशुपतिप्राणा प्रवीणार्पणे
पुण्यानां जननी जयत्यनुपलं दुर्गा निसर्गोज्ज्वला ।।४।।

श्यामाङ्गे महिषासुरे बलभिदोऽपि त्रासदे दुर्जये
सङ्ग्रामाङ्गणपातिते नखमणिस्फूर्जत्पदारोपणात्।
कृष्णे सान्द्रपयोधरे सुललिता विद्युच्छटेव स्फुटं
सौन्दर्यं समवाप दुर्लभतमं दुर्गा निसर्गोज्ज्वला।।५।।



## ४. लक्ष्मीः

आमोदमर्पयति, शीतलतां तनोति
पद्मं विमुद्रयति पङ्कमपाकरोति।
हंसं प्रसादयति, हर्षयति द्विजेशं
स्वच्छाशया शरदिव प्रमदाय लक्ष्मीः।।१।।

शीताधिकात्परमसंकुचिताङ्गवल्लीं
म्लानाननां निहितमूकजनप्रवृत्तिम्।
निस्तब्धतामुपगतां वनदेवतां किं
सुप्तां प्रबोधयति सम्प्रति कुन्दलक्ष्मीः?।।२।।

आमन्त्रयत्यभिमतं मलयानिलं या
या कोकिलानुपदिशत्यनुगातमुच्चैः।
आम्रांश्च योजयति मञ्जुलमञ्जरीभिः
सा जृम्भते शिशिरकालिक-कान्तलक्ष्मीः।।३।।

या भूमिकेव कुसुमाकरकान्ततायाः
सारस्वतापचितिमङ्गलजन्मभूमिः ।
उद्दामकाम-परमोत्सववन्दिता या
सा पाटलप्रणयिनी शिशिराङ्कलक्ष्मीः।।४।।

या तीर्थराजगरिमाणमलङ्करोति
शम्भुं विवाहयति शैलपतेर्दुहित्रा।
या होलिकां दहति, कुङ्कुमकम्रकेलि-
मुल्लासयत्यनुपलं शिशिरैकलक्ष्मीः।।५।।

सम्पादितां निरुपमां सुषमां वनान्ते
कान्तेन कौतुकवता शिशिरेण पूर्वम्।
प्रख्यापयत्यथ नरेन्द्रनिसर्गवृत्त्या
स्वीयप्रभावजनितामृतुराजलक्ष्मीः।।६।।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली